श्रीः ।

लघुधातुरूपसंग्रहः ।



बदायूँनगरसंस्थापित-संस्कृतपाठशालाया
मुख्याध्यापकेन साङ्गवेदविदा

झोपाख्यपण्डित-श्रीदेवानन्दशर्मणा

संकलितः

तदीयगुरुवरझोपाख्यपण्डितश्रीमुकुन्दशर्मणा
टिप्पण्यादिभिः सुसंस्कृतश्च ।



सचायं

मुम्बय्यां

तुकाराम जावजी

इत्येतैः निर्णयसागराख्ये स्वीयेऽङ्कनालये
मुद्रयित्वा प्राकाश्यं नीतः ।

संवत् १९७०, सन १९१४.

मूल्यं २ आणकाः

इदं पुस्तकं १८६७ वर्षीय २५ तमराजनियमानुसारेण
लेखारूढं कृत्वास्य सर्वेऽधिकाराः प्रकाशयित्रा
स्वाधीनीकृताः सन्ति.

PUBLISHER:—Tukaram Javaji, } the "Nirnaya-sagar" Press,
PRINTER:—R. Y. Shedge, } 23, Kolbhat Lane, Bombay.

भूमिका ।



अयं ग्रन्थोऽस्मत्प्रियशिष्येण दरभङ्गामण्डलान्तर्गत र-
मौलीग्रामवास्तव्य श्रीमद्रुद्रमणिशर्मतनुजन्मना श्रीदेवानन्द-
शर्मणा लघुसिद्धान्तकौमुदीस्थनिखिलधातुरूपाणि सविशे-
षं सुस्पष्टं धात्वर्थादिविवेचनपुरःसरमात्मनोऽवबोधाय रसर-
ऌवसुभूमि(१८९६)मितेसवीयवर्षे सङ्गृहीतुमुपक्रान्तो-
ऽस्माकमपि दृग्गोचरोऽकारि । अस्माभिश्च समवलोक्योपयुक्तै-
रितरांशैः संपूर्यायं पिपठिषुजनानामतीवोपयोगितामापादितः।
सोऽयमद्यास्माभिरेव मुम्बापुरनिवासिभ्यः श्रीलश्रीतुकाराम-
जावजीति शुभाभिधेभ्यः ससर्वाधिकारं मुद्रापयितुमर्पितो दि-
दृक्षुजनमनस्तोषाय। तत्राद्यः परिच्छेदोऽधुना मुद्राप्य प्रका-
शितोऽस्ति । यदीमं सादरं संगृह्यानुगृह्णीयुर्ग्राहकमहोदयास्त-
दास्यावशिष्टोऽपि भागो झटित्येव मुद्रणामाप्स्यत इति बाढं
समाशास्महे—ऽतस्त्वर्यतामस्य संग्रहाय प्रबुभुत्सुभिः पिपठि-
षुभिरिति निगदति—

दरभङ्गामण्डलान्तर्गतहाटीतप्पान्तर्गतहरि-
पुरग्रामनिवासी-नन्दलालशर्मतनुजन्मा,
पं० श्रीमुकुन्दशर्मा.

श्रीः ।

लघुधातुरूपसंग्रहः ।

श्रीमद्गुरुचरणाम्भोरुहमनिशं हृदि विचिन्त्य कुर्वेहम्।
लघुसिद्धान्तस्थानां धातूनां रूपसंग्रहं स्वमुदे ॥ १ ॥
अत्र विशेषं किंचिद्ब्रुवे सुखं यच्च धारयन्स्वजनः ।
धातुप्रयोगभेदे नो मुह्येत्तेन मत्कृतिः फलिता ॥२॥

(धातुस्वरूपमाह)

क्रियाविशिष्टा या शक्तिस्तद्विशिष्टोऽथ यो मतः ।
स धातुर्द्विविधो ज्ञेयः सनाद्यन्तो गणस्थितः ॥ ३ ॥

क्रियाविशिष्टशक्तिविशिष्टत्वं क्रियावाचकत्वम् । आद्यं वैशिष्ट्यं च स्वमुख्यविशेष्यताकबोधाऽनुकूलत्वसम्बन्धेन । अन्त्यं वैशिष्ट्यं च स्वपर्याप्त्यधिकरणत्व-स्वनिरूपकार्थविषयकबोधतात्पर्येणोच्चरितत्वोभयसंबन्धेन । तथाच दरिं द्रातीति दरिद्रेत्यादौ दरिकर्मकद्राणकर्त्रादितात्पर्यके दुर्गतित्वाद्यवच्छिन्नमुख्यविशेष्यताकबोधानुकूला या शक्तिस्तत्पर्याप्त्यधिकरणत्वेऽपि तन्निरूपकार्थविषयकबोधतात्पर्येणोच्चरितत्वाभावात् कुत्सितगमनमुख्यविशेष्यताकबोधानुकूलद्रापपर्याप्तशक्तिनिरूपकार्थविषयकबोधतात्पर्येणोच्चरितत्वेऽपि तादृशशक्तिपर्याप्त्यधिकरणत्वाभावाच्च नातिव्याप्तिः । लिडा-

दौ तु आस्वादनमुख्यविशेष्यताकबोधानुकूला या शक्तिस्तत्पर्याप्त्यधिकरणत्वस्य तन्निरूपकास्वादनविषयको य आस्वादनकर्तृमुख्यविशेष्यताको बोधस्तत्तात्पर्येणोच्चरितत्वस्य च सत्वान्नाव्याप्तिरिति हृदयम् । सनाद्यन्त इति । "सनाद्यन्ता धातवः" "भूवादय" इति न्यासिनां केषांचिन्मतेनायंक्रम उपन्यस्तः ॥ ३ ॥

(सनाद्यन्तो यथा)

सन्क्यच्काम्यच्क्यङ्क्यषोऽथाचारक्विप्णिज्यङौतथा
यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः ॥ ४ ॥

(अथ गणाः)

भ्वाद्यदादिर्जुहोत्यादिर्दिवादिः स्वादिरेव च ।
तुदादिश्च रुधादिश्च तनञ्क्रयादिचुरादयः ॥ ५ ॥ इति,
एषां लक्षणभेदांस्तत्तद्गण आदितो वक्ष्ये ।
बोधक्रमं च सुधियामवेक्षणीयं विशेषं च ॥ ६ ॥
आदौ धातुगतानामिद्विहतानामिहानुबन्धानाम् ।
वच्मि फलं किल सकलं मन्दधियामिद्धये बुद्धेः॥७॥

इहासिँल्लघुधातुरूपसङ्ग्रहे आदौ प्रथमं धातुगतानां धातुघटकानामिता इत्संज्ञया विहतानां लुप्तानामित्संज्ञाप्रयोज्य-

---

१ घटकत्वं च विषयित्वसम्बन्धावच्छिन्नव्यापकत्वम् । ज्ञानं विषयि अर्थोहि विषयः यत्र (ज्ञाने) विषयितासंबन्धेन सानुबन्धो धातुरस्ति तत्र (ज्ञाने) विषयितासम्बन्धेनानुबन्धो नास्तीति वक्तुमशक्यत्वात्तदधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वरूपतद्व्यापकत्वस्य तत्र सत्वाल्लक्षणसमन्वयः॥व्यापको हि व्याप्यत्वेनाभिमतस्याधिकरणे येन संबन्धेन वर्तते स (सम्बन्धः) व्यापकतावच्छेदकः । व्यापकता च तत्संबन्धावच्छिन्नेति बोध्यम् ॥

लोपवतामित्यर्थः। अनु फलमनुसन्धाय पश्चाद्बुध्यन्ते घटकी-
क्रियन्त इत्यनुबन्धा अनुदात्तादयो वक्ष्यमाणास्तेषां सकल-
मेकैकं सर्वस्येति समस्तं फलं मन्दधियां शिक्ष्यमाणानां बा-
लानां बुद्धेरिद्धये दीप्त्यर्थं वच्मि कथयामि ॥ ७ ॥

अनुदात्तोऽथ ङकारो द्वावपि तनुतस्तङानयोर्योगम्।
कर्तृगतेऽथ फले द्वौ ञस्वरितौ चापि तत्कृतौ दृष्टौ ८

अथ अनुदात्तोऽकारादिर्ङकारश्चेति द्वावपि तङानयो-
र्योगं तनुतः विस्तारयतस्तद्योगप्रयोजका भवन्तीत्यर्थः। योग-
श्च धातोः परत्रैव, प्रत्ययः परश्चेत्यनुशासनात्। यथा एध वृद्धौ
एधते, एधमानः, शीङ् स्वप्ने, शेते, शयानः, अनुदात्तङित
इत्यात्मनेपदम्। अथ द्वौ ञकारस्वरितौ चापि कर्तृगते फले
क्रियाफलस्य कर्तृगामित्वविवक्षायां तत्कृतौ उक्तकार्यकृतौ
दृष्टौ, तदविवक्षायां तु शेषात्कर्तरीति परस्मैपदमेव, यथा
श्रिञ् सेवायाम्, श्रयति, श्रयन्, श्रयते, श्रयमाणः, यज
देवपूजादौ यजति, यजन्, यजते, यजमानः। स्वरितञित
इत्यात्मनेपदमन्यत्तूक्तम् ॥ ८ ॥

निष्ठायां खलु भावेऽथादिकृतौ वेट्कृतां तनुते।
आकारस्त्ववशिष्टेऽनिट्को निष्ठाभिधे दृष्टः ॥ ९ ॥

अथ आकारस्तु निष्ठायां क्तक्तवत्वोर्विषये, भावे,
आदिकृतावादिकर्मणि च, वा इट् यस्मात्तस्य भावस्तां वेट्-
कृतां तनुते, विकल्पेट्प्रयोजको भवति, विभाषा भावादिकर्म-
णोरितिसूत्रात्—यथा ञिमिदा स्नेहने, मिन्नमनेन, मेदितम-
नेन, प्रमिन्नः, प्रमेदितः। अवशिष्टे निष्ठाभिधे अनिट्को

दृष्टः । यथा–मिन्नः, मिन्नवान्, आदितश्चेतीट्प्रतिषेधः ॥९॥

इस्तु नुमं विदधानः क्तक्तवतोरीरनिट्कतां कुर्वन् ।
दृष्टो विधौ विकल्पं विदधत्क्त्वायामिटः शम्भुः॥१०॥

इस्तु इकारस्तु नुमं विदधानः दृष्टः, यथा टुनदि समृद्धौ नन्दति, नन्दन्, इदितोनुमिति नुम् । ईः ईकारः क्तक्तवतोर्विषये अनिट्कतां कुर्वन् दृष्टः यथा–उन्दी क्लेदने उन्नः, उन्नवान्, स्वीदित इति नेट् । शम्भुरुकारः क्त्वायामिटः विधौ विकल्पं विदधत् दृष्टः यथा–दिवु क्रीडादौ, द्यूत्वा, देवित्वा, उदितोवेति वेट् ॥ १० ॥

ऊकारोऽपि विकल्पं कर्तुमिटं चाश्रितो बहुशः ।
ऋस्तु विह्रस्वेऽङोर्थे लृश्च विकल्पेऽस्ति तस्यैवेर्॥११॥

ऊकारोऽपि बहुशः बहुषु धातुषु इटं विकल्पं कर्तुमाश्रितः । यथा–गुपू रक्षणे जुगोपिथ, जुगोप्थ, स्वरतिसूतीति वेट् । ऋस्तु विह्रस्वे ह्रस्वाभावार्थे आश्रित इत्यनुषङ्गो यथासम्भवमुत्तरत्रापि, यथा लोकृ दर्शने, अलुलोकत् । नाग्लोपीति ह्रस्वनिषेधः, अङः अर्थे लृश्च यथा, गम्लृ गतौ, अगमत्, पुषादीत्यङ् । तस्यैवाङो विकल्पे इर् अस्ति, यथा णिजिर् शौचपोषणयोः, अनिजत्, अनैक्षीत् ॥ ११ ॥

एकारस्सिचि वृद्धिं रुणद्धि निष्ठातकारस्य ।
ओकारस्तु विधाने नस्य सुखार्थं समाश्रितःकश्चित् १२

एकारः सिचि परे वृद्धिं रुणद्धि । यथा–कटे वर्षा० अकटीत्, ओकारस्तु निष्ठातकारस्य स्थाने नस्य विधाने समाश्रितः, यथा, भुजो कौटिल्ये, भुग्नः, भुग्नवान्, कश्चिदका-

रादिरतधात्वादिषु सुखार्थं सुखेनोच्चारणार्थं समाश्रितः॥१२॥

क्तस्य विशेषविधाने ञिश्च विधानेऽथुचष्टुश्च ।
ङुः क्रिविधौ किल षोऽणश्च विशेषानुसंधये कथितः

ञिश्च क्तप्रत्ययस्यार्थविशेषे विधाने समाश्रितः । यथा—ञिमिदा स्नेहने मिन्नः । अत्र वर्त्तमान इत्यधिकृत्य ञीतः क्त इति वर्त्तमाने क्तः । टुश्चाऽथुचो विधाने समाश्रितः । यथा—टुवेपृ कम्पने वेपथुः, ट्वितोऽथुच् । ङुः क्रिप्रत्ययस्य विधाने समाश्रितः । किल इति निश्चयेन, यथा ङुपचष् पाके पक्रिमम् । ङ्वितः क्रिः, क्रेर्मन्नित्यम् । षः अङः विधौ । यथा—जॄष् वयोहानौ, जरा, षिद्भिदादिभ्योऽङ् इत्यङ् । णश्च इणो यणित्यादौ गत्यर्थस्यैतेरेव ग्रहणं यथा स्यादिति विशेषस्यानुसंधानार्थं कथितः । पाणिनिनेति सर्वत्र कर्तृपदमध्याहार्यम् । चकारादिक् स्मरणे, इत्यत्र ककारः अधीगर्थेत्यत्र विशेषणार्थः, एवमन्यदपि यथायथमुन्नेयम् ॥ १३ ॥

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥ १४ ॥

क्रियापदघटितवाक्यजन्यशाब्दबोधक्रमबोधनाय क्रियापदघटकपदानामर्थानाह फलेति । धातुः फलव्यापारयोरर्थयोः स्मृतः पूर्वाचार्यैरुक्त इत्यर्थः । उभयत्र धातोरेकनालावलम्बिफलद्वयन्यायेन खण्डशो विश्रान्ता एकैव शक्तिः । इत्थं च फ-

---

१ यथा ओहाक् त्यागे इत्यत्र ककारः ह्रश्व त्रीहिकालयोरित्यत्र हाको हाऽश्च ग्रहणार्थः ॥

लव्यापारोभयवाचकत्वं सर्वस्यापि धातोरिति सिद्धम्। एवं सति यत्रापि फलमात्रं धात्वर्थनिर्देशे निर्दिष्टं तत्र (तदनुकूलो) व्यापारोऽप्यनुसंधेय एव। तिङ आश्रये, फलाश्रये कर्मणि व्यापाराश्रये कर्तरि च स्मृताः। उक्तवदर्थः तुशब्दोऽप्यर्थे, तेन भावस्यापि[2] सङ्ग्रहः। इति पदार्थमुक्त्वा वाक्यार्थमाह **फले इति**। प्रधानं प्राधन्यवान् निरूपितत्वं सप्तम्यर्थः प्राधान्यान्वयि, फलनिरूपितप्राधान्यवान्व्यापार इत्यर्थः। अनयोश्चानुकूलत्वं जन्यजनकभावापरपर्यायः सम्बन्धः तिङर्थः कर्तृ—कर्म—संख्या—काल[1]ः। विशेषणम् यथायथमिति शेषः। तद्यथाकर्ता व्यापारे वृत्तित्वेन, कर्म निष्ठत्वेन फले, संख्या वैशिष्ट्यनियामकेन समवायेन कर्त्तरि, कालो व्यापारे वृत्तित्वेन। सकर्मकधातुसमभिव्याहारे कर्तुः कर्मणश्चोपादाने देवदत्तो हरिं भजतीत्यादौ देवदत्तादेरभेदेन प्रत्ययार्थे कर्तरि। तथाच—देवदत्ताभिन्नैकत्वविशिष्टकर्तृवृत्तिर्हरिनिष्ठप्रीत्यनुकूलो वर्तमानकालवृत्तिर्व्यापार इत्यादिक्रमेण बोधः। द्विकर्मस्थले गां दोग्धि पयो गोप इत्यादौ च, पयोनिष्ठविभागानुकूलो यो गोनिष्ठो व्यापारस्तदनुकूलो, गोपाभिन्नैकत्वविशिष्टकर्तृवृत्तिर्वर्त्तमानकालवृत्तिर्व्यापार इत्यादिक्रमेण शाब्दबोधः। अकर्मकस्थले तु फलव्यापारयोरुभयोरपि कर्तुरेवान्वयः। परया कर्तृसंज्ञया बाधाच्च फलाश्रयत्वेऽपि न तस्य कर्मत्वं, इत्थं च देवदत्तोऽस्तीत्यादौ देवदत्तनिष्ठात्मधारणानुकूलो देवदत्ताभि-

---

१ संख्याकालावप्यर्थौ।

२ भावस्य चाख्याते प्राधान्यमेव "भावप्रधानमाख्यातम्" इति हि यास्कादिभिरुक्तम्।

त्वैकत्वविशिष्टकर्तृवृत्तिर्वर्तमानकालवृत्तिर्व्यापार इत्यादि क्रमेण बोधः ॥ चतुर्भिरुपाधिभिरपि धातोः क्रिया अकर्मिका भवति, तदुक्तम् ।

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥ १ ॥ इति,

अत्र कर्मण इति उपसङ्ग्रहादिषु त्रिष्वन्वेति तथाचाद्ये, वहति भारमिति सकर्मकोऽपि वहतिर्नदीवहतीत्यादावकर्मकः। अत्र च स्यन्दने पूर्ववत्र प्रापणे १ जीवति नृत्यति प्राणो गात्रमितिचोपसङ्गृहीतङ्कर्म २ मेघो वर्षति जलमिति प्रसिद्धं कर्म ३ हितान्न यः संशृणुते स किंप्रभुः । अत्र हितमित्यविवक्षितं कर्म ४ ॥ अर्थविशेषद्योतकोपसर्गबलेनाकर्मका अपि अर्थान्तरे सकर्मका यथा—मा माने तनौ ममुः, उदरं परिमाति; भवति, अनुभूयते आनन्दो देवदत्तेनेत्यादि । तदुक्तम्,

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥ १ ॥ इति ।
अधिकमन्यत्रानुसन्धेयम् ॥ १४ ॥

नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजश्शकारश्चे षाट्वर्गस्तवर्गजः ॥ १५ ॥

प्रतिज्ञातं विशेषं यथायथमुपयोक्ष्यमाणमवश्यानुसन्धेयं बालव्युत्पत्तय आह **नकारजाविति** । धातुषु झलि परतो विद्यमानौ अनुस्वारपञ्चमौ[1] नकाराज्जातौ चे चकारे

---

१ ङ्ञणनमाः ।

परतो विद्यमानः शकारः सकाराज्जातः षाद्रेफषकारात्परतो विद्यमानष्टवर्गस्तवर्गाज्जातः इति तेन गवाक् भनक्ति तृप्यात् सुवृट् दन्ध्रन्ति तस्थौ इत्यादौ नलोपादिसिद्धिः॥१५॥

फलव्यापारयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥ १६ ॥

सकर्मकाकर्मकभेदज्ञानोपायमाह—फलेति । एकनिष्ठतायामेकमात्रनिष्ठतायां भिन्नाधिकरणावृत्तितायामिति यावत् । धातुरकर्मकः न विद्यते कर्म यस्य तथाभूतः (यथास्त्यादिः) तयोः फलव्यापारयोर्धर्मिभेदे आश्रयभेदे सकर्मकः कर्मणासह वर्त्तते तथाभूतः (यथा पच्यादिः) उदाहृत उक्तः। धातुरिति पूर्वान्वयी । तथाच फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम् । फलव्यधिकरणव्यापारवाचकत्वं च सकर्मकत्वमिति फलितमिति सुधीभिराकलनीयम् ॥ १६ ॥

धात्वर्थाश्चेहोक्ता ह्युपलक्षणतामितास्ततो भवतिः ।
उत्पत्तावित्येवं सम्भवतोऽन्येऽपि योगतः प्रादेः १७

इहास्मिन् पाणिनीयधातुपाठे उक्ता धात्वर्था उपलक्षणताम् अविद्यमानत्वेऽपि व्यावर्त्तकतामन्यार्थोपक्षेपकतां वा इताः प्राप्तास्ततस्तस्मात्कारणात् भवतिः भूधातुः (इकृस्तिपौ धातुनिर्देशे) उत्पत्तौ प्रयुज्यत इति शेषः । यथा यागात्स्वर्गो भवति, उत्पद्यते इत्यर्थः, इत्येवं क्रमेण अन्येऽपि धातवः संभवतः यथासंभवं प्रादेर्वक्ष्यमाणशब्दसमुदायान्यतमस्य एकस्य द्वयोस्त्रयाणां चतुर्णां वा योगे अर्थान्तरे प्रयुज्यन्त इति शेषः ॥ १७ ॥

प्रपराऽपसमऽन्वऽवनिस्निर्दुस् दुर्व्याङ्न्यधय एते
अप्यऽतिसूदभिप्रतिपर्युपानुगाः प्रादयः प्रोक्ताः १८

प्रादीनाह प्रपरेत्यादिना ॥ १८ ॥

उपसर्गा गतिसंज्ञाश्चामी एव क्रियायोगे ।
स्युर्द्योतयन्ति धातुष्वेव निलीनार्थमात्मयुतौ ॥ १९ ॥

अमी प्रादय एव क्रियायोगे (क्रियावाचकभ्वादिधातुसमभिव्याहारे) उपसर्गास्तत्संज्ञकाः (पाणिनिसङ्केतसम्बन्धेन तत्पदवन्तः) गतिसंज्ञाश्च स्युः । उपसर्गाः क्रियायोगे, गतिश्चेति सूत्रस्वरसात् । अमी प्रादय आत्मनो युतौ योगे (धातुभिरितिशेषः) सत्यां धातुष्वेव निलीनमव्यक्तमर्थं द्योतयंति तथाच जन्यबोधविषयीभूतक्रियाविशेषविषयकतात्पर्यग्राहकत्वे सति प्राघन्यतमत्वमुपसर्गत्वम् । जन्यत्वं च प्रत्यासत्त्या यं प्रत्युपसर्गत्वं वक्तव्यं तन्निरूपितमेव, इत्थं च प्रतिगताः सेचका यस्मिन्स प्रतिसेचको ग्राम इत्यत्रोपसर्गात्सुनोतीत्यादिना न षः । प्रतिशब्दस्य गतिक्रियां प्रत्येव तत्रोपसर्गत्वात् एतत्फलितमेव " यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञे"-ति बोध्यम् ॥ १९ ॥

तं तं धातोः पूर्वं विशिष्टशिष्टैर्निरूप्यातः ।
शाब्दिकरूपैर्गदिताः स्वग्रन्थे द्योतकाः प्राद्याः ॥ २० ॥

अतः अस्मात्कारणात् शाब्दिकरूपैः प्रशस्तैः शाब्दिकैः (अस्य उक्ता इत्यनेनान्वयः) विशिष्टैरतिमहद्भिः शिष्ट-

---

१ उपगृह्याख्यातं तस्यैवार्थविशेषं सृजन्तीत्युपसर्गाः ।

रिष्टसाधनांशे भ्रमरहितैः सहेति शेषः (अस्य निरूप्येत्यने-नान्वयः) धातोः पूर्वं (क्वचिद्व्यवहितं प्रायेणाव्यवहितं–ते प्राग्धातोः, व्यवहिताश्चेति सूत्रस्वरसात्) तं तं वीप्सायां (साकल्येन क्रियासम्बन्धरूपायां) पदस्य द्विर्भावः, य-थासम्भवं सर्वमप्युपसर्गजातं निरूप्य अर्थतोऽवधार्य (निश्चित्य) स्वग्रन्थे वाक्यपदीयादौ प्राद्या उक्तस्वरूपा द्योतका उक्ताः द्योतकत्वं च स्वसमभिव्याहृतपदनिष्ठ-वृत्त्युद्बोधकत्वं, क्वचित्क्रियाविशेषाक्षेपकत्वम् । यथा प्रा-देशं विलिखतीत्यत्र विमाय लिखतीति विर्मानक्रिया-क्षेपकः, क्वचित्सम्बन्धपरिच्छेदकत्वम् ।यथा कर्मप्रवचनीयाना-मन्वादीनामित्यन्यत्र व्यक्तम्, तेन अनुभूयते आनन्दश्चैत्रेण, उपास्यते गुरुः शिष्येणेत्यादिषु कर्मणि लकारसिद्धिरिति स्पष्टं तत्रैव ॥ २० ॥

नैयायिकैस्तु युक्त्या वाचकता स्थापिता तेषु ।
पक्षद्वयेऽपि न क्षतिरस्मदभीष्टाऽभिधेयेषु ॥ २१ ॥
उपसर्गेणैकेन द्वाभ्यां त्रिभिरपि तथा धातुः ।
संयुज्यतेऽर्थसिद्ध्यै चतुर्भिरपि युज्यते कश्चित्॥२२॥

धातुः भ्वादिशब्दस्वरूपमेकेनोपसर्गेणार्थसिद्धये स्वार्था-वबोधसिद्धये संयुज्यते यथा, तथा द्वाभ्यामुपसर्गाभ्यां त्रिभिरप्युपसर्गैः कश्चिद्विरल एव धातुश्चतुर्भिरपि युज्यते २२

एकेन यथा विहरति युग्मेनाभ्यवहरत्यनलैः ।
समभ्यवहरति समभिव्याहरतीत्यब्धिसंख्यैश्च॥२३॥

उदाहरति, **एकेनेत्यादि,** अत्र हृञ् हरण इत्ययमेक-द्वित्रिचतुर्भिरुपसर्गैर्युतस्तंतं विहारादिकमर्थमवगमयति २३

श्रदन्तराविःप्रादुःशब्दा अपि धातुतः पूर्वम् ।
प्रप्रभृतिवत्प्रयोज्या विशिष्टशिष्टानुसारेण ॥ २४ ॥
अप्यवयोरल्लोपो भागुरिमततः क्रियायोगे ।
यथावगच्छति पिदधात्यवगच्छत्यपिदधातितराम् ॥

विशिष्टशिष्टानां व्याकरणविदामभियुक्तानां प्रयोगानुसारेण श्रत् अन्तर् आविः प्रादुः शब्दा अपि धातोः पूर्वं प्रादिशब्दवत्प्रयोज्याः यथा, श्रद्दधाति (श्रद्धा करताहै) अन्तर्धिः (ढाँकना) आविष्कृतम् (प्रगट किया) प्रादुर्भवति (प्रगट होताहै) ॥ २४ ॥ २५ ॥

अथ प्रादीनामर्थान्संकलिताच्छास्त्रतो वक्ष्ये ।
[१२]प्रः[१]शक्ति[२]तृप्ति[३]शुद्ध्यम्[४]यादि[५]कृती[६]च्छासु पूजायाँम्॥२६॥

प्रः[१] शक्त्यादिषु अष्टादशसु अर्थेषु वाच्येषु बोधनीयेषु प्रयुज्यते, अत्रेदं बोध्यम्—अयमर्थनिर्देश उदाहरणमात्रं नत्वेतावत्स्वेवार्थेष्विति निश्चित्य गमयितव्यम्, अन्येष्वपि प्रयोगबाहुल्यदर्शनात्। इदंतु तत्त्वम्—एषां द्योतकतया तत्तदर्थप्रतीतिः क्वचित्प्रयोगोपाधिवशात्, क्वचित्तु धातुनैव तदर्थाभिधानेऽनुग्राहकतया (सहकारितया) क्वचिच्चाविनाभावेन, तद्विना तदर्थाननुभवादिति यथायोगमुन्नीयाऽर्थोदाहरणं ज्ञेयम्, तथैवोदाहरिष्यते च। तत्र शक्तिः १ सामर्थ्यं तत्र यथा—प्रभवति, (समर्थ होताहै)। तृप्ति २ रिच्छापूर्तिस्तत्र

---

१ अनुकरणशब्दत्वादव्ययत्वाभावः एवमुत्तरत्रापि यथायथमूह्यम्.

यथा प्रभुक्तमन्नम् (अन्नको इच्छापूर्ति करके खाया) । शुद्धि३र्नैर्मल्यं तत्र यथा प्रसन्नमुदकम् (जल स्वच्छ है)-अग्रे४ यथा—प्रवालम् (नवीन पल्लव) । आदिकृति५रारम्भस्तत्र यथा—प्रयातः । (चलना आरम्भ किया) । इच्छा६कामस्तत्र यथा—प्रार्थयते कन्याम् (कन्याको चाहताहै) । पूजा७प्रशंसा तत्र यथा—प्राञ्जलिः स्थितः (भली भाँति हाथजोड खडा हुआ) ॥ २६ ॥

नियोगवियोगवाञ्छाप्रकर्षभृशसम्भवार्थेषु ।
शान्तिसमीक्षणदीर्घोदीर्णगतार्थेषु वाच्येषु ॥ २७ ॥

नियोग ८ आज्ञा तत्र यथा—प्रयुक्तः (आज्ञा पाया अथवा नियुक्त (भर्त्ती) किया गया) । वियोगे ९ यथा-प्रोषितः (परदेश गया) । वाञ्छा१०उत्कटेच्छा तत्र यथा—प्रेप्सुः (ललचाया हुआ) । प्रकर्षो ११ गुणवत्तरमाधिक्यम्, तत्र यथा—प्रजल्पति (बहुत अच्छा बोलता है) । भृश १२ मत्यन्तं तत्र यथा—प्रचण्डो राजा (अत्यन्त कोपशाली राजा) अथवा—द्वेषप्रवादिनो दायादाः (बहुत करके बुरे विरसचों बोलनेवाले निजी भाई आदिके होते हैं) । सम्भवः १३ प्रकाशस्तत्र यथा—हिमवतो गङ्गा प्रभवति (हिमालयपर्वतसे गंगाजी निकलती हैं) । शान्तौ १४ यथा—प्रशान्तोऽग्निः (आग बुत (झ) गई) । समीक्षण १५ मालोचनं तत्र यथा—प्रलोकयति (ध्यान देकरके देखताहै) । दीर्घे १६ यथा—प्रलम्बो देवदत्तः (देवदत्त लम्बा है) अथवा प्रबाला मूषका (इन मूसोंको बडे २ रोम हैं) । उदीर्ण १७ उद्रिक्तस्तत्र य-

था. प्रवरो राजा (प्रबल (जबरदस्त) राजा है)।गते १८
यथा, प्राचार्यः, प्रगत आचार्य इत्यर्थः (आ पहुँचे आचार्य)
आदिनाऽन्येप्यर्था यथाप्रयोगमूह्याः ॥ २७ ॥

परास्तु भृशवधविक्रमविचारगमनमोक्षणार्थेषु ।
प्रतिलोमताऽभिमुखता प्राधान्येष्वप्यथापरवः ॥२८

परा भृशादिषु नवसु अर्थेषु प्रयुज्यते, तत्र, भृशे १ पराजितः (वार वार हारगया) वधो २ हिंसा तत्र परासनम् (मारना)। विक्रमस्त्वतिशक्तिता ३ तत्र पराक्रान्तः (अतिबलवान्से दबाया गया)। विचारे, ४ परायण(विचारकरके अपनेसमीपमें रखनेवाले) गमनं गमस्तत्र, ५ पराङ्गः परागतमह इत्यर्थः। (गया दिन) मोक्षणे, ६ पराकृतः (छोडदिया गया) प्रतिलोमताऽनभिमुखीभवनं ७तत्र,पराङ्मुखः पराञ्चत्यनभिमुखीभवति मुखं यस्य सः (मुख फेर बैठा)। अभिमुखतायाम्,८ परावृत्तः (सन्मुख लौटआया) अप्राधान्ये, ९ पराधीनः (दूसरेके वशमें) अपिना पृथक्कारे, पराकृतः (पृथक् किया गया) ॥ अथ अप इति रवः शब्दः वियोगादिषु सप्तस्वर्थेषु उक्तः ॥ २८ ॥

वियोगवर्जनयोरपकृष्टौ हृष्टौ च निर्देशे ।
चौर्येऽपकृतावथसंभ्रशोभनसामर्थ्यसंगेषु ॥ २९ ॥

तत्र वियोगे, १ अपयाति (अलग जाताहै) वर्जने, २ अप त्रिगर्तेभ्यो वृष्टो देवः (त्रिगर्तदेशको छोडके मेघ वरस गया) अपकृष्टिरपकर्ष ३ स्तत्र, अपशब्दः (अपभ्रंश विगडाहुआ शब्द) हृष्टिर्हर्ष२स्तत्र, अपहसति (प्रसन्नचित्तसे

विष्णुके भाग (हिस्सेमें) हैं) पश्चादर्थे, ७ अनुरथम् (रथके पीछे) सहार्थे, ८ नदीमन्ववसिता सेना (नदीसे मिलीहुई सेना) सामीप्ये, ९ अनुवनमशनिर्गतः [वनके समीप विजली (वज्र) गिरी] हीने १० अनुहरिं सुराः [विष्णुसे हीन (नीचे दर्जेके) सब देवता हैं] स्वाध्यायो ११ वेदस्तत्र, अनुवाकमधीते (ऋचाओंका समूहविशेषको पढ़ता है) अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपीत्यमरादधिष्ठानमिहाध्यासनं १२ तच्चाक्रमणं तत्र यथा, अनुशोणं पाटलिपुत्रम्(सोनभद्रनदके किनारेको आक्रमणकरके पटनाशहर है) अनुबन्धनमनुबन्धः १३ दोषोत्पादेऽनुबन्धः स्यादित्यमरः, अर्थनिर्देशेऽप्युपात्तोऽयमुदाहरणतामप्यर्हति, उदाहरणान्तरंतु अनुशयः, अथानुशयश्चिरद्वेषानुतापयोरित्यमरः । (पश्चात्ताप—दिलकी मड़क) अभिमुखे १४ अनुमातरं वत्सो धावति (माताके सन्मुख बछरा दौडता है) ज्ञानजनकज्ञानविषयो लक्षणं १५ तत्र यथा जपमनुप्रावर्षत् जपज्ञानज्ञाप्यं जपोत्तरकालिकमतीतं वर्षणमिति तदर्थः ("जप आरम्भ होनेके अनन्तर मेघ वरसा" यह जो-जप आरम्भ हुये देखगया था-उसने अब आयके वर्षाके कार्य देखकर पूछाकि कदा अवर्षत् ? कब वर्षा हुई उसके प्रतिउत्तर वाक्य है) ॥ ३२ ॥

विसर्जनार्थेऽप्युक्तोऽथावध्वनिरीषदर्थशुद्ध्योश्च ।
व्याप्तिवियुक्त्योराश्रयणे ज्ञाने परिभवे चोक्तः ३३॥

विसर्जनार्थे, १६ अनुसृष्टो गच्छति (छोड़दिया गया व्यक्ति जायरहाहै) ॥ अथ—अव—इति ध्वनिः शब्दः

ईषदर्थादिषु सप्तस्वर्थेषु उक्तस्तत्रेषदर्थे, १ अवलम्बते (जरा सहारेको पाता है) शुद्धौ, २ अवदातं मुखम् (साफमुह) व्याप्तौ, ३ अवकीर्णं पांशुभिः (धूलिओंने चारोंओर फैल गई) वियुक्तिर्वियोगस्तत्र, ४ अवमुक्तः कान्तया [स्त्रीसे वियुक्त हो (विछुड) गया] आश्रयणे, ५ अवष्टभ्य यष्टिं गच्छति [लकड़ीके आसरे (सहारे) से चलताहै] ज्ञाने, ६ अवगतोऽर्थः (अर्थ जानागया) अनादरः परिभवः परीभावस्तिरस्क्रियेत्यमरात्परिभवस्तिरस्कार७स्तत्र, अवज्ञन्ति (सब लोग अनादर करके मारतेहैं) ॥ ३३ ॥

अथ निस्[८] निरिमौ प्रोक्तौ लत्वादेर्भिन्नरूपतां गमितौ पापात्यये[२] मृशे[३] लाभे[४] अतिक्रमे[५] निर्द्धारणादेशे[७] ॥ ३४ ॥

अथ निस् निर् इमौ पापादिष्वष्टस्वर्थेषु प्रोक्तौ, तत्रैतावाननयोर्विशेषः यदिमौ लत्वादिकार्यानुरोधेन क्वचिदेव भिन्नरूपतां भजत इति, यथा सान्तस्य, निरयते, रान्तस्य निलयते, आद्ये रुत्वस्यासिद्धत्वादुपसर्गस्यायतावितिन लत्वमेवं दुस्दुरोरपि एतावानेव भेद ऊह्यः, पापे, १ निर्मर्यादं गमयति कालम् (न्यायमार्गस्थितिको छोड़के अर्थात् पापसे समय व्यतीत करताहै) अत्ययो २ ध्वंसस्तत्र यथा, निर्मेघं गगनम् (आकाशमें मेघ न रहा—अर्थात्—मेघ नष्ट होगया) भृशे, ३ निर्णीतम् (अत्यन्त निश्चय किया गया) लाभे, निर्दिशति दातारम् (लाभके लिये दातापुरुषको बतादेता है) अतिक्रमे, ६ निःकौशाम्बिः (कौशाम्बी

नगरीसे निकल गया) निर्धारणे, ६ निश्चितम् (निश्चय किया गया) आदेशे, ७ निर्दिष्टः (आज्ञाको पाया) ॥ ३४ ॥

वियोजने चाथो दुस्दुरौ विवर्णत्वकुत्सनयोः ।
अलाभकृशताकष्टेषदर्थदौष्ट्यचेष्वसम्पत्तौ ॥ ३५ ॥

वियोजने, ८ निःशल्यं कृतवान् [चुभी हुई बाण-की फली (अग्रभाग) निकाल दिया] अथोऽनन्तरम् दुस् दुरौ विवर्णत्वादिषु अष्टस्वर्थेषु प्रोक्तौ, तत्र विवर्णत्वे, १ दुश्चर्म, (जो रोगविशेष– "चडक" आदिक होजानेसे चर्म श्वेतहोजावे उसे दुश्चर्म कहतेहैं) कुत्सने, २ दुराचारः(कुत्सितआचरण करनेवाला) अलाभे, ३ दुर्लभः (जो नही मिलसकै) कृशतायाम्, ४ दुर्बलः (दुबरा) कष्टे ५ दुर्जीवनम् (कष्टसे जीना) ईषदर्थे, ६ दुर्मतिः (छोटीबुद्धिका) दौष्ट्ये, ७ दुरदृष्टम् (दुर्भाग्य) । सम्पदभावोऽसम्पत्तिस्तत्र, ८ दुर्दिनम् (गरीबी) ॥ ३५ ॥

अथ विध्वनिरवलम्बेषदर्थनानार्थसहनेषु ।
विनियोगे च वियोगे हेत्वर्थे निश्चयार्थे च ॥ ३६ ॥

अथ वि इति ध्वनिः शब्दः अवलम्बादिषु त्रयस्त्रिंशत्स्वर्थेषु उक्तः, तत्रावलम्बे, १ विष्टभ्य यष्टिं गच्छति-(लकडीके सहारेसे चलता है) ईषदर्थे, २ विलोभितः (जरा ललचाया) नानार्थे, ३ विचित्रा सूत्रस्य गतिः पाणिनेः (पाणिनिमुनिकी सूत्रकी गति=अर्थात्=अर्थज्ञान नानाप्रकारका है) सहने, ४ विषहते (सहताहै) विनियोगे, ५ विनियुक्ते (भर्त्तीकरताहै) वियोगे, ६ वियुक्तः (विछुड गया) हेत्वर्थे ७

उदाहरणं वेदे एव न लोके । निश्चयार्थे, ८ विनिश्चयः कश्चिदिहोपपद्यते, ॥ ३६ ॥

व्याप्तौ[९] शुद्धौ[१०] श्रेष्ठे[११] विज्ञाने[१२] निग्रहेऽभिभवे[१४] ।
पदपूर्तौ[१५] कलहेऽर्थे[१६] भृशातिशयशौर्यमोहेषु[१७] ॥ ३७ ॥

व्याप्तौ, ९ व्याप्नोति (फैलताहै) शुद्धौ १० विशुद्धः (साफ) श्रेष्ठे ११ विशिष्टः (बड़े) विज्ञाने १२ विजानाति (विशेष जानता है या विज्ञान* करताहै) निग्रहे, १३ विनिगृह्णाति (अपने अधीनमें लाता है) अभिभवे, १४ व्याकुलः (घबड़ाया हुआ) पदपूर्त्तौ १५ पादपूरणे, भुवि विनिहितपादा जानकी प्रस्थिताऽभूत्, कलहे १६ विग्रहः (लडाई) भृशे, १७ विशोधयति सुवर्णम् (सोनाको वार २ तपाता है) अतिशये, १८विशेषा विद्या (अधिक विद्या है) शौर्ये, १९विक्रान्तः (पराक्रमकर्नेवाला अर्थात् वहादुर) मोहे, २० विमनस्कः [मुग्ध (मनघुटार) हुआ] ॥ ३७ ॥

वाग्युद्धे[२१] ऐश्वर्ये[२२] अस्मृतौ[२३] भूषा[२४] कुत्सा[२५] पिशुनतासु[२६] ।
भयदूरार्थोत्कर्षप्रदानदृष्टानभिमुखेषु[३२] ॥ ३८ ॥

वाग्युद्धे २१ विवदन्ति, (वाक्कलह करताहै) ऐश्वर्ये, २२ विभुर्देवः (ऐश्वर्यवान् देव हैं) अस्मृतौ, २३ विस्मृतम् (भूलगया) भूषालंकारस्तत्र, २४ विभूषितः (अलंकारयुक्त) कुत्सा २५ निन्दा तत्र, विरूपः (कुरूप अर्थात्-बदसकल) अथवा जनः कुलाचारमुचं विगायति (अपने कुलाचार छोडनेवालेको लोक निन्दा करते हैं) पिशुनतायाम्, २६विसूचयति

---

* मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोरित्यमरः ।

(चुगली करता है) भये, २७विभीतः (डराहुआ) दूरार्थे २८ विकृष्टोऽध्वा (रास्ता दूरतक है) उत्कर्षे, २९ विवाह (जिस संस्कारसे उत्कर्ष (अधिकाई)की प्राप्ति होय—(व्याह) ३०प्रदाने, वितरति धनं याचकेभ्यः (मागनेवालोंको धन बहुत करके देता है) दृष्टं ३१ दर्शनं तत्र, विलोभनीया कन्या (देखने पर लुभावनेवाली लड़की) अनभिमुखे, ३२ विमुखः (मुख फेर बैठा) ॥ ३८ ॥

अनवस्थायां[33] चाथाङि[1]च्छाभय[3]वाक्य[34]शाठ्येषु ।
कृच्छ्रे[6]षदर्थ[7]बन्धनसन्नि[8]ध्यभिवि[9]ध्यनु[10]भवेषु ॥ ३९ ॥

अनवस्थायां, ३३ विभ्रान्तः (अनवस्थितचित्त अर्थात् घबड़ाया हुआ) चकरात्संशये, विचिकित्सा (संदेह) अथ आङ् इच्छादिषु अष्टाविंशतिष्वर्थेषु उक्तः, तत्रेच्छायाम्, १ आकाङ्क्षते (चाहताहै) भये,२ आतङ्क (डर) वाक्ये ३ आ एवं नु मन्यसे, पूर्वमित्थं नामंस्थाः इदानीं त्वमेवं मन्यसे, (पहिले तुम ऐसे नहीं मानते थे अब तुम ऐसे मानने लगे हो) शाठ्ये,४ आचरति कपटेन, (शठताके साथ व्यवहार करता है) कृच्छ्र ५ आगतः (मुसकिलसे आने पाये) ईषदर्थे, ६ ओष्णम् (किंचित् गरम) बन्धने, ७ आमुञ्चति वत्सस्य गले प्रग्रहम् (बछरेके गलेमें बान्धनेके लिये फन्दा डालता है) सन्निधौ, ८ आसन्नम् (पासका) तेन सहेत्यभिविधि ९ स्तत्र, आबालं हरिभक्तिः (लड़केसे लेके सबको हरिकी भक्ति करनी चाहिये—अथवा—बालपनसे लेके अन्तिम अवस्थातक

हरिकी भक्ति करनी चाहिये) अनुभवे, १० आ शीतम् (ओ हो गरम है) ॥ ३९ ॥

निमन्त्रणाशादानादेशनिवृत्तिप्रतिष्ठासु ।
स्पर्द्धाभिमुख्यविस्मयसंश्रयशक्त्यूर्द्धकर्मसु च ॥४०॥

निमन्त्रणे, ११ आमन्त्रितो देवदत्तः(देवदत्तको न्योता दिया) आशायाम्, १२ आशास्ते (आशाकर रहे हैं) आदाने, १३ आदत्ते (ग्रहण करता है—लेताहै) आदेशे, १४ आदिष्टः (आज्ञाकों पाया) निवृत्तौ, १५ आवर्जितम् (लौटा दिया) प्रतिष्ठायाम्, १६ आस्पदम् (ठहरनेके जगह) स्पर्धायाम्, १७आह्वयते मल्लो मल्लम् (पहलमान पहलमानकों स्पर्धा (सारीखत) करके लडनें के लिये पुकारता है) आभिमुख्ये १८आयाति (सामने आय रहाहै)विस्मये, १९आ नष्टं मे धनम् (हाय ! मारा गया मेरा माल) संश्रये, २० आश्रयति (सहारा लेता है) शक्तौ, २१ आभाति गगने चन्द्रः (चन्द्रमा आकाशमें शोभ सकताहै—या शोभनेमें समर्थ है) ऊर्ध्वकर्मणि, २२ आरोहति पर्वतम् (पहाड़ऊपर चढ़ता है)४०

साग्राऽऽदिकृतिविकृत्यन्तर्भावस्थाननिर्लयादौ ।
निश्शब्दउपरमसन्निध्याश्रयसंश्रयभृशार्थेषु ॥ ४१ ॥

साग्रे, २३ आयतिः (उत्तरकाल=अखीर) आदिकृतौ, २४ आरभते कटम् (चटाइकों बनानें लगा है) विकृती २५ रूपान्तरप्राप्तिस्तत्र, आच्छन्नम् (ढ़कगया) अन्तर्भावे, २६ आपीता मसी सिकताभिः (वालूनें सब श्याहीकों

शोषली अर्थात् अपनेमें मिलालिया) स्थाने, २७ आस्थानम् (बैठक) निलये २८ आवासः (वास-स्थान) आदिना मर्यादायाम्, सा च तेन विने-त्येवं प्रतीयते, यथा, आ मुक्तिं संसारः (मुक्तिके विना—अर्थात्—जबतक मुक्ति न भई तबतक संसार है) प्राप्तौ, आसादितमनेन (यहनें पाया) आश्लेषे, आलिङ्गति (मिलताहै) साध्ये, आनयति (लाताहै) इत्यादि ॥ नि-शब्द उपरमादिषु एकविंशत्यर्थेषु उक्तस्तत्र, उपरमे, १ नि-वृत्तः (लौट गये) सन्निधौ, २ निकृष्टः (कुछ नीचे दर्जेके= अर्थात्=पास २ के) आश्रये, ३ निलयः (रहनेकी जगह) संशये, ४ निगमनम्, नि—संदिह्य—गम्यते-ज्ञायतेऽत्रानेन वा—नि—गम—ल्युट्—संदेहपूर्वकं प्रतिकूलप्रमाणबाधनेन प्रकृतप्रमाणोपसंहारात्मकः पञ्चावयवन्यायमध्ये—"तस्मात् वह्निमान्" इत्याद्याकारश्चरमावयवः (संशयपूर्वकनिश्चय-विशेष भृशार्थे, ५ निगृहीतः (अत्यन्तही नियमबद्ध कैद किया गया) ॥ ४१ ॥

कौशलनिवेशबन्धनविन्यासासन्ननित्येषु ।
राशिक्षेपविमोक्षान्तभावार्थदानेषु ॥ ४२ ॥

कौशले, ६ निपुणः (होसियार या चतुर) निवेशे, ७ निविशते (घुसताहै) बन्धने, ८ निबद्धः (बँध गया) विन्यासे, ९ नगरविन्यासः(नगरकी सजावट=त्यारी) आसन्ने, १० निकटः (पास) नित्ये, ११ निवसति (नित्य वास करता है) राशौ, १२ निकारो मणीनाम् (मणिओंका खान या ढेर) क्षेपे, १३ निक्षेपः (धरोहर) विमोक्षे, १४ निसृष्टः (छोड-

दियागया) अन्तर्भावे, १५ निपीतमुदकं सिकताभिः (वालु-ओंने पानी शोषलीं) अधोऽर्थे, १६ निपतितः (गिरपडा) दाने, १७ निवापः (पितरोंको देना=तर्पणवगैरह) ॥४२॥

आदेशाऽऽदरनिश्चयविलोकनेऽप्यथमतोऽधिरवः ।
अध्ययनाधिक्यस्मृत्यधिकारैश्वर्यसंवनने ॥ ४३ ॥

आदेशे, १८ आज्ञा तत्र, निदेशः, (आज्ञा—अर्थात्—हुकूम) आदरे, १९निवेदनम् (आदरपूर्वक कथन करना)निश्चये, २० निगमः निश्चित्य गम्यतेऽर्थोऽनेनात्र वा,(वेद)विलोकने, २१ निध्यानम् (निगाह करके देखना) अथ—अधि—इत्ययं रवः शब्दोऽध्ययनादिषु षट्स्वर्थेषु मतस्तत्र अध्ययने, १ अधीते (पढ़ताहै) आधिक्ये,२ अधिको राजा वलेन (राजा बलसें जवर है) स्मृतौ, ३ मातुरध्येति, (माताकों सरण करता है) अधिकारे, ४ अधिकृतः (अधिकारी) ऐश्वर्ये, ५ अधिपतिः (प्रभु=मालिक) संवननं सज्जीकरणम् ६ तत्र,अधिकरोति रथी रथम् (गाडीवान् रथ—(गाडी) कों त्यार करताहै) ॥ ४३ ॥

अथापिराशीर्गर्हाभूषामृतिसम्भवनिवृत्तिषु ।
प्रश्नसमुच्चयशङ्कायुक्तपदार्थे यथेष्टकृतौ ॥ ४४ ॥

अथ अपिः आशीरादिषु एकादशस्वर्थेषु वर्त्तते, तत्राशिषि, अपि जीव्याद्वर्षशतम् (भगवान् करैं शौ वर्ष जीवै) गर्हा २ निन्दा तत्र, अपि स्त्रियो वृषलाः (शूद्र स्त्रियोंके ऐसा खराव चलनसें रहताहै) यद्वा, धिग्देवदत्तमपि स्तूयाद्वृषलम् (धिक्कार देवदत्त कों क्या शूद्रकीभी स्तुति करैगा)

भूषालंकार३ स्तत्र, अपि नह्यति हारम् (हार पैन्हके शरीरकों अलंकृत करताहै) मृतौ, ४ अपि मृतः (मरभीगया) सम्भवे५ अपि चोरो भवेत् (सायत चोर होय) यद्वा अपि गिरिं शिरसा भिन्द्यात् (सम्भव है कि पर्वतकोंभी शिरसें यह तोड़दे) निवृत्तौ, ६ अपिगच्छ गृहम् (घर लोट जाओ) प्रश्ने, ७ अपि शान्तो वह्निः (आग बुझ (त) गई क्या ?) समुच्चये, ८ अपिसिञ्च अपिस्तुहि (अभिषेक भी करौ स्तुति भी) यद्वा, स्त्रियं पालय पुत्रमपि (स्त्री पुत्र दोनों का पालन करौ) शङ्कायाम्, ९ अपिधास्यति द्वारम् (क्या दरवाजा घेरलेगा) युक्तपदार्थे, १० घटोऽपि (घडा औरभी उस्के साथ कुछ) यथेष्टकृतौ,११ अपिगच्छ (चाहौ तो जाओ) ॥४४॥

अतिशब्दो भृशदानाऽतिक्रमनाशेषु विक्रमणे ।
प्रकृष्टवृद्धयुल्लङ्घप्रशंसनाऽबुद्धवाच्यादौ, ।
सुरनुमतौ भृशपूजाप्रशस्तिशुभकृच्छ्रसम्पत्सु ॥४५॥

अतिशब्दो भृशादिषु दशस्वर्थेषु वर्त्तते, तत्र भृशे १ अत्यर्थम् (अत्यन्त) दाने, २ अतिसर्जनम् (देना) अतिक्रमे, ३ अतिमालः (मालासें बढ़गया) नाशे, ४ अत्ययः (नाश) विक्रमणे, ५ अतिरथः अमितान् योधयेद्यस्तु सम्प्रोक्तोऽतिरथस्तु स इत्युक्तलक्षणः शूरः (अनेकोंको अकेला लडानेवाला बहादुर) प्रकृष्टे, ६ अतिबलः (बडा बली) वृद्धौ, ७ अतिमेघं गगनम् (आकाशमें मेघ बहुत बढ गया) उल्लङ्घे, ८ अतिकालः (काल उलँघ गया) प्रशंसने, ९ अत्युत्तमम् (प्रशंसा करनेके योग्य) न बुद्धो ज्ञातो वाच्योर्थो यस्य सोऽबु-

द्भवाच्य १०स्तत्र, अतिगहनम् (बडे कठिन अर्थात् इसका अर्थ समझनें के योग्य नहीं) आदिना भयेऽसम्प्रत्यर्थे क्षेपे च, अत्याहितम् (महाभय) इत्याद्युदाहरणम् ॥ सुः अनुमत्यादिषु सप्तस्वर्थेषु वर्त्तते, तत्रानुमतौ, १ सुकृतं त्वया (तुमनें ठीक किया) भृशे, २ सुतप्ता आपः (अत्यन्त गरम पानी) पूजायाम्, ३ सुब्राह्मणः (पूजा करनेके योग्य ब्राह्मण) प्रशस्तौ, ४सुरूपो देवदत्तः (देवदत्त अतिसुन्दर हैं) शुभे ५सुकर्म (शुभकर्म) कृच्छ्रे, ६ सुदुष्करः (कष्टसाध्य) संपदि, ७ सुसमृद्धा मगधाः (मगहके लोग सम्पन्न (धनवान्) हैं) ॥ ४५ ॥

(१८)
अथोच्चैर्निर्लाभवियोगशक्ति-
प्रकाशनाश्चर्यचलोर्ध्वकृत्ये ।
अभावमोक्षप्रबलप्रधाना-
स्वास्थ्येषु बन्धे च मतोऽर्थविद्भिः ॥४६॥

अथ उत् इत्ययं ध्वनिर्लाभादिषु त्रयोदशस्वर्थेषु मतः तत्र, लाभे १ उत्पन्नं द्रव्यम् (दाम उठ आया) वियोगे, २ उद्गच्छति, (राह छोडके चलताहै) यद्वा उद्दाम (रज्जुमुक्त अर्थात् बन्धसे खुलाहुआ) चकाराद्धुतोपदायाम् उत्कोचः (रिशवत्) शक्तिरुत्साहः तत्र ३ उल्लासः (उल्लास) प्रकाशने, ४ उच्चरति (शब्दको व्यक्त करता है) आश्चर्ये,५ उद्ध(वः)र्षः । (आश्चर्य (अचरज) कों देखनेवाला उत्सव) चले, ६ उच्चलति (उचल (खसक) ताहै) ऊर्ध्वकृत्ये, ७ पीठादुत्तिष्ठति (पटला—या—पीढापरसें उठ ख-

डा होता है) अभावे,८ उत्पथः (वेराह) मोक्षे, ९ उन्मुञ्चति कञ्चुलिकाम् (चोली बन्द खोलती है) प्रबले, १०उद्धतः (जबरदस्त) प्रधाने, ११ उत्कृष्टः (बडा वा सरदार) अवास्थ्ये, १२उत्सुकः(वेचैन) बन्धे, १३ उद्बद्धानुरागा (प्रेमसें बँधी) ॥ ४६ ॥

<(१९)>
अभिर्भृशेच्छाऽभिमुखाशनार्चा
रुगुक्तिवीप्साऽध्ययनप्रयोगे ।
सारूप्यसामीप्यसदृक्त्वनृत्ये-
त्थम्भूतवाग्लक्षणवाचकश्च ॥ ४७ ॥

अभिः भृशादिषु षोडशस्वर्थेषु वर्त्तते तत्र भृशे, १ अभिरतः (अत्यन्त तत्पर=लौलीन) इच्छायाम् २ अभिलषति, (अभिलाष=इच्छा=करता है) अभिमुखम् ३ (सन्मुख=सामनें) अशने, ४ अभ्यवहरति, (खाता है) अर्चायाम्, ५ अभिवादयति गुरुम् (गुरुका पूजन करता है) रुगुक्ती रोगकथनम्६ तत्र, अभ्यमितः (रोगी) वीप्सायाम्,७ देवं देवमभिसिञ्चति (प्रत्येक देवताकों स्नान कराता है) अध्ययने, ८ अभ्यसति (पढके अभ्यास करताहै) प्रयोगोऽत्र प्रत्यभिज्ञानम्९तत्र, प्रत्यभिजानाति (पहचानताहै) सारूप्ये,१०अभिरूपः(समान रूपका)सामीप्ये,११अभ्यासः (पास) सदृक्त्वं सादृश्यन्तत्र, १२ अभिजातः (अपने पूर्वजोंके तुल्य पण्डित,) नृत्ये, १३ अभिनयः (भावकों अङ्गचेष्टासें बतलाना) इत्थम्भूताख्याने, १४ भक्तो हरिमभि (जोकी किसीका भक्त है एसो करके जानागया था सो आज हरि (वि-

प्णु)का ठहरा)वाचि, १५ अभिदधाति (कहताहै)लक्षणे, १६ हरिमभिवर्त्तते गरुडः (भगवान् जहाँ रहते हैं तहाँ गरुडजी रहते हैं) ॥ ४७ ॥

प्रत्यारवः सदृशरोगनिवृत्तिवीप्से-
त्थम्भूतलक्षणनिवारणहिंसनेषु ।
अङ्गीकृतिप्रतिनिधिप्रतिदानकोप
व्यत्यासतद्युति च भागसमाभिमुख्ये ॥४८॥

प्रति इत्ययमारवः शब्दः सदृशादिषु सप्तदशस्वर्थेषु वर्त्तते, तत्र सदृशे, १ प्रतिकृतिः (प्रतिमा) रोगे, २ प्रतिश्यायः (पीनसरोग) निवृत्तौ, ३ प्रतिहतः (हटगया) वीप्सायाम्, वृक्षं ४ वृक्षं प्रति सिञ्चति, (प्रत्येक वृक्षपर पानीछिड़कता है) इत्थम्भूताख्याने, ५ भक्तो विष्णुंप्रति (जो की किसीका भक्त है ऐसा करके जानागया था सो आज विष्णुका ठहरा) लक्षणे ६ वृक्षं प्रति विद्योतते विद्युत् (वृक्षके ओर बिजली चमकती है) निवारणे, ७ प्रतिषिद्धः (रोकदियागया) हिंसने ८ प्रतिघातनम् (मारना) अङ्गीकृतौ ९ प्रतिज्ञातम् (स्वीकार किया) प्रतिनिधौ १० प्रद्युम्नः कृष्णात्प्रति, (प्रद्युम्न श्रीकृष्णका प्रतिनिधि) प्रतिदानं विनिमयः ११ प्रत्यर्पणञ्च तत्राद्ये, तिलेभ्यः प्रतियच्छति माषान् (तिलसें उर्द बदलता है) द्वितीये, प्रत्यर्पयति धनम् (माल लौटारता है) कोपे, १२ प्रतिघा (क्रोध) व्यत्यासे, १३ प्रतिकूलः(विरुद्ध) तद्युजि तद्युक्ते, १४ प्रतिपत्तिः(पदप्राप्ति) भागे, १५ भागवति लक्ष्मीर्हरिम्प्रति (लक्ष्मी हरिकी भाग (हिस्सेमें) हैं) स-

मे. १६प्रतिरूपः(सम)आभिमुख्ये,१७प्रतिसूर्यं गच्छति,(सूर्यके सन्मुख जाताहै) ॥ ४८ ॥

पर्यारवो[२१] निवसनोपरमार्चनेत्थ-
म्भूतामयाभरणवर्जनशोकवीप्से ।
आश्लेषदोषकथनाहितलक्षणेषु
व्याप्तौ च शेषपरितोऽर्थ उपासनायाम्॥४९॥

परि इत्ययमारवः शब्दः निवसनादिषु सप्तदशस्वर्थेषु प्रयुज्यते, तत्र निवसने, १ परिदधाति (पेन्हता है) उपरमे, २ परिपूर्णो घटः (घडा भरगया अर्थात् अब इसमें नहीं अमायगा) अर्चने, ३ परिक्रमः (पूजा) इत्थम्भूताख्याने,४ भक्तो विष्णुं परि (जो की यह किसीका भक्त है ऐसा करके जानागया था सो आज विष्णुके ठहरा) आमये, ५ परिवाहिकः (फैलानेवाला रोग) आभरणे, ६ परिष्करोति कन्याम् (कन्याकों अलंकृत करता है—अर्थात् भूषण (गहना) आदिक पहनाताहै) वर्जने, ७ परित्रिगर्तेभ्यो वृष्टो देवः(त्रिगर्त्तदेशकों छोडके मेघवरसा) शोके, ८परिदेवनम् (पश्चात्ताप अर्थात् पिछताना=अपशोश) वीप्सायां,९वृक्षं वृक्षं परिसिञ्चति,(प्रत्येक वृक्षपर पानी छिकडता है) आश्लेषे, १० परिष्वजते कन्याम्(कन्याकों गोदमें करता है) दोषकथने, ११ परीवादः(विद्यमानदोष कहना)अहितःशत्रुस्तत्र,१२परिपन्थी (विरोधी-वैरी) लक्षणे, १३ वृक्षं परि विद्योतते विद्युत् (वृक्षके ओर विजली चमकती है) व्याप्तौ, १४ पर्यग्निर्ग्रामः (अग्निसें व्याप्त अर्थात् जिसें चारों ओर अग्नि फैलगई है

ऐसा गाम) शेषे, १५ परिशिष्टम् (वचा हुआ) परितोऽर्थे १६ परिपाण्डु (चारो और पाण्डुवर्ण) उपासनायाम्, १७ परिचर्या, (उपासना=सेवा) ॥ ४९ ॥

(२२)
उपो वितरणाऽर्थनाऽचमनशक्तिमृत्यूनत-
द्युगार्यकृतितुल्यताकुशलताऽधिकारम्भणे ॥
विदूषणकथागुणार्पणसदेशताव्याप्तिषु
प्रकीर्तित इति प्रपूर्वकनिनादवाच्यो बुधैः ॥ ५० ॥
प्रादेर्योगविशेषे धात्वर्थानां भिदावलोक्याज्ञैः ।
सोपसृष्टधात्वर्थादर्शे बुधवरसुबोधशास्त्रिकृते ॥५१॥

उपः वितरणादिषु षोडशस्वर्थेषु, इतीत्थं प्रपूर्वकस्य प्रादेर्निनादस्य शब्दस्य वाच्योऽवगम्योर्थो बुधैर्विशेषज्ञैर्वैयाकरणैः प्रकीर्तितः कथितस्तत्र वितरणे १ उपो यथा, उपहर-त्यर्थं देवदत्तस्य (देवदत्तका धन आपस करताहै=या=देता है) यद्वा उपहारः (नजर=भेट) अर्थना २ याच्ञा तत्र, उपच्छन्दः (प्रार्थना) आचमने ३ उपस्पर्शः (आचमन) शक्तौ,४ उपकारी, प्रधानस्यानुगुण्यसम्पादनसमर्थः (उपकार करनेवाला याने मददगार) मृत्यौ ५उपरतः (मरगये) ऊने६ उपहीनं सुराः (सुराः हरिभगवान्सें हीन (नीचे दर्जेका) सब देवता हैं) तद्युजि तद्युक्ते७उपपन्नमेतत् (यह ठीक मिला) आचार्यकृतिराचार्यकरणम्, ८उपनयते माणवकम् (लडकेका उपनयन (जनेउ) करतेहै=अर्थात्=उपनयनपूर्वक अध्ययनसें उपनयनकरनेवाले पुरुषमें आचार्यत्व सम्पादन करते हैं)तुल्य-

तायाम्, ९उपपतिः (पतिके तुल्य=जार) कुशलतायाम्, १० उपधा, धर्मार्थकाममोक्षैश्च प्रत्येकं परिशोधने। उपेत्य धीयते यस्मादुपधा तेन कीर्तिता, इत्युक्तेर्धर्माद्युपन्यासेन मन्त्रिणाम्परीक्षणम् (धर्मादिककर्के मन्त्रीइत्यादिकका परीक्षा लेकर पास रखना यह चतुराई का काम है) अधिके, ११ उपपरार्धे हरेर्गुणाः ([1]परार्धसंख्यासे भी बढ़के विष्णु भगवान्का गुण हैं) आरम्भणे, १२ उपक्रमः(आरम्भ)विदूषणकथायाम् १३ उपक्रोशः (निन्दा याने गिल्ला कर्ना)गुणार्पणे, १४ एधोदकस्योपस्कुरुते, (लडकी अपना गुण जलमें देतीहै) सदेशता सामीप्यं १५ तत्र उपगङ्ग पाटलिपुत्रम्(गंगाजीके पास ही पटना है)व्यासौ, १६ उपकीर्णं पांशुभिः (धूल फैल गई) ॥ ५० ॥ ५१ ॥

तत्र श्रूयमाणशब्विंकरणो गणपठितो भ्वादिः तत्राद्यो भूसत्तायाम् अकर्मकःसेट् परस्मैपदी,[2]सतो भा-

---

१ ऋदुपधाच्चाकृपिचृतेरित्यत्र, ऋदिति तपरकरणादनित्यण्यन्ताश्चुरादय इति मते, णिज्विरहिणां भ्वादित्वमेवाऽवृत्करणेन तस्याऽकृतिगणत्वात्केचिदिच्छन्ति, अन्ये तु नित्यमिति श्रुतिक्रियायां विशिंषन्ति । प्रकृतिप्रत्यययोर्मध्ये पतितः प्रत्ययो विकरण इत्युच्यते ॥

२ अयं प्राप्तावात्मनेपद्यपि,तत्र स्वार्थणिच्सन्नियोगेनैवात्म-

---

१ एकं दशशतञ्चेति सहस्रमयुतं तथा । लक्षञ्च प्रयुतञ्चेति कोटिरर्बुदमेवच ॥ १ ॥ वृन्दं खर्वो निखर्वश्च शंखं पद्मश्च सागरः । अंत्यमध्यं परार्धञ्च दशवृद्ध्या यथाक्रमम् ॥ २ ॥ इति ॥

वः सत्ता विद्यमानता(होना)तत्रभू तद्वाचकइत्यर्थः अकर्मकेभ्यः कर्त्तरि भावे च लकाराः १०

नेपदमित्येके, प्राप्त्यर्थस्य चास्य चुरादौ पाठात्तत्राधृषाद्वेति विभाषा णिच् ॥

३ वाचकत्वं सप्तम्यर्थः, आकाशे त्रिदिवे नाक इत्यादिवत् अस्यास्ति समानार्थत्वाद्विद्यमानता आत्मधारणानुकूलो व्यापार इत्यनर्थान्तरम्, अस्तीत्यनेन हि स्वस्वरूपेऽवतिष्ठत इत्येव प्रतीयतेऽतएवासन्नविनाशधर्मिकं किङ्करोतीति प्रश्ने अस्तीत्युत्तरमविसंवादि भवति, अस्तीत्युत्पन्नस्यात्मधारणमुच्यत इति निरुक्तकारोक्तिश्च आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यत इति वाक्यपदीयोक्तिश्च, स्वरूपधारणमेव चात्र फलं तस्य च व्यापारेणैकाधिकरण्यादकर्मकत्वम्, अस्यैव चानूपसृष्टस्यानुभवार्थकत्वात्पूर्वोक्तदिशा सकर्मकत्वमपि[1] ॥

४ तत्र कर्त्तर्यनुपदं वक्ष्यत एव भावे तु तिङ्वाच्यस्य तस्य लिङ्गसंख्यान्वयाऽयोग्यत्वरूपासत्त्वार्थत्वात्कर्तृकर्मवाचिभ्यां युष्मदस्मद्भ्यामेकार्थबोधकत्वरूपसामानाऽधिकरण्याभावाच्च प्रथमपुरुषैकवचनमेव दशसु लकारेषु, एकवचनमुत्सर्गतः करिष्यत इति भाष्यसिद्धान्तात्, यथोदाह्रियते १ भूयते, २ बभूवे, ३ भाविता—भविता, ४ भाविष्यते—भविष्यते, ५ भाविषतै—भाविषातै, भविषतै—भविषातै ६ भूयताम् ७ अभूयत ८ (वि०) भूयेत (आ०) भाविषीष्ट—भविषीष्ट, ९

---

१ अनुभवोहि स्मृतिभिन्नं ज्ञानं तच्चावरणभङ्गानुकूलो व्यापारः। तत्रावरणभङ्गस्य विषयनिष्ठत्वाद्व्यापारस्य च कर्तृनिष्ठत्वात्फलव्यधिकरणव्यापारवाचित्वेन सकर्मकत्वं सूपपन्नम्.

तत्र वर्तमाने लँट् ॥ १ ॥

प्रयोगो यथा,

स-ईभवति,तौ-भवतः,ते-भवन्ति,प्रथमः पुरुषः। त्वम्-भवसि, युवाम्-भवथः, यूयम्-भवथ मध्यमः पुरुषः। अहम्-भवामि-आवाम्-भवावः वयम्-भवामः उत्तमः पुरुषः।

भूताँनद्यतनपरोक्षे लिट् ॥ २ ॥

अभावि, १० अभाविष्यत—अभविष्यत, ॥ अनूपसृष्टस्य कर्म्मण्यपि, प्रयोगो यथा, स अनुभूयते—तौ अनुभूयेते—ते अनुभूयन्ते प्र० पु० ॥ त्वमनुभूयसे—युवाम् अनुभूयेथे—यूयम् अनुभूयध्वे म० पु० ॥ अहम् अनुभूये—आवाम् अनुभूयावहे—वयम् अनुभूयामहे उ० पु० ॥ इत्येवमूह्यम् ॥

५ वर्त्तमानत्वं च प्रारब्धाऽपरिसमाप्तत्वं, क्रियागतं;कालगतं तु तादृशक्रियाश्रयत्वमिति विशेषः ॥

६ शत्रादेशे तु, भवन्, भवन्तौ, भवन्त इत्यादि सुबन्तनिर्दिष्टमुदाहार्यम् ॥

७ भूतत्वं वर्त्तमानध्वंसप्रतियोगिसमयवृत्तित्वम्, अनद्यतनत्वं च, अतीताया रात्रेरन्त्ययामार्धेनाऽऽगामिन्याः पूर्वयामार्धेन च सहितो दिवसोऽद्यतनस्तद्भिन्नत्वं कालगतम्। क्रियागतं तु तद्वृत्तित्वमिति विशेषः॥ परोक्षत्वं च साक्षात्कृतमित्येतादृशविषयताशालिज्ञानाविषयत्वम् । वस्तुतो वर्त्तमानत्वादिकं कालगतमेव तस्यैव तद्भेदभिन्नत्वाभिधा-

स-बभूव, तौ-बभूवतुः, ते-बभूवुः प्र० पु० त्वम्-बभूविथ, युवाम्-बभूवथुः, यूयम्-बभूव म० पु० अहम्-बभूव,आवाम्-बभूविव,वयम्-बभूविम उ०पु०

भविष्यत्यनद्यतने लुट् ॥ ३ ॥

स भविता, तौ-भवितारौ, ते-भवितारः प्र० पु० त्वम्-भवितासि, युवाम्-भवितास्थः, यूयम्-भवितास्थ म० पु० अहम्-भवितास्मि, आवाम्-भवितास्वः, वयम्-भवितास्मः उ० पु० ॥

भविष्यति लृट् ॥ ४

स-भविष्यति, तौ-भविष्यतः, ते-भविष्यन्ति प्र० पु० त्वम्-भविष्यसि, युवाम्-भविष्यथः, यूयम्-भविष्यथ म० पु० अहम्-भविष्यामि, आवाम्-भविष्यावः, वयम्-भविष्यामः उ० पु०

(छन्दसि) लिङर्थे[11] लेट् ॥ ५ ॥

नात्, क्रियायांतु तद्वृत्तित्वादौपचारिकं तत्त्वं विस्तरस्त्वन्यत्र द्रष्टव्यः ॥

८ क्वस्वादेशे तु बभूवान्, बभूवांसौ, बभूवांस इत्यादि सुबन्तमूह्यम् ॥

९ भविष्यत्वं च वर्त्तमानप्रागभावप्रतियोगिसमयवृत्तित्वम् ॥

१० शत्रादेशे तु, भविष्यन्, भविष्यन्तौ भविष्यन्तः इत्यादि सुबन्तमूह्यम् ॥

११ लिङर्थो वक्ष्यते, इदं च सूत्रमष्टाध्याय्याम् ३।४।७॥

स-भावि[१२]षति-भाविषाति, भाविषत्-भाविषात्-भाविषद्-भाविषाद्, भविषति-भविषाति, भविषत्-भविषात्-भविषद्-भविषाद्, भवति-भवाति, भवत्-भवात्-भवद्-भवाद्, तौ-भाविषतः-भाविषातः, भविषतः-भविषातः, भवतः-भवातः, ते-भाविषन्ति-भाविषान्ति, भाविषन्[१३]-भाविषान्, भविषन्ति-भाविषन्ति, भविषन्-भविषान्, भवन्ति-भवान्ति, भवन्-भवान्, प्र० पु० त्वं-भाविषसि-भाविषासि, भावि[१४]षः-भाविषाः, भविषसि-भविषासि, भविषः-भविषाः, भवसि-भवासि, भवः-भवाः, युवाम्-भाविषथः-भाविषाथः, भविषथः-भविषाथः, भवथः-भवाथः, यूयम्-भाविषथ भाविषाथ, भविषथ भविषाथ, भवथ भवाथ म० पु० अहम्-भावि[१५]षामि २ भाविषाम् २ भ-

---

१२ अत्र भू ति इत्यवस्थायां शपोऽपवादः, सिब्बहुलं लेटि ३।१।३४ इति बहुलं सिप् तेन पक्षे शप्, सिब्बहुलं णिद्वक्तव्य इति वा णित्त्वं सिप् इट् अचोऽञ्णिति वृद्धिः, लेटोऽडाटौ ३।४।९४ इति—पर्यायेणाडाटौ, तौ च पितौ, २ पक्षे इतश्च लोपः परस्मैपदेषु ३।४।९७ इति इलोपः झलां-जशोन्ते, वावसाने ४ णित्त्वाभावे ६ सिपोऽभावे शपि ॥६॥

१३ इकारलोपे तकारस्य संयोगान्तलोपः ॥

१४ इकारलोपे सस्य रुत्वविसर्गौ ॥

१५ अत्राट्पक्षेऽपि एकादेशस्य पूर्वान्तत्वेन ग्रहणादतो दीर्घो यञीति दीर्घे एकाकारकमेव रूपम् ॥

विषामि २ भविषाम् २ भवामि २ भवाम् २ आवाम्-भाविषाव[१६] २ भाविषावः २ भविषाव २ भविषावः २ भवाव २ भवावः २ वयम्-भाविषाम २ भाविषामः २ भविषाम २ भविषामः २ भवाम २ भवामः २ उ० पुरुषः ॥

प्रवर्त्तनाया (म्विधि[१७]ध्यादिरूपाया) माशिषि च लोट्॥६॥

तत्र भवतादितिरूपमाशिष्येव, न विध्यादौ,

स भवतु-भवतात्, तौ-भवताम्, ते भवन्तु, प्र० पु० त्वम्-भव-भवतात्, युवाम्-भवतम्, यूयम्-भवत, म० पु० अहम्-भवानि, आवाम्-भवाव, वयम्-भवाम उत्तमः पुरुषः ॥

भूतेऽनद्यतने लङ् ॥ ७ ॥

स-अभवत्, तौ अभवताम्, ते-अभवन्, प्र० पु० त्वम्-अभवः, युवाम्-अभवतम्, यूयम्-अभवत, म० पु० अहम्, अभवम्, आवाम्-अभवाव, वयम्-अभवाम, उ० पु० ॥

---

१६ स उत्तमस्य ३।४।९८ इति सस्य वा लोपः ॥

१७ विधौ (निकृष्टस्य प्रवर्त्तने) निमन्त्रणे (आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्त्तने) कामचारानुज्ञायाम्, सत्कारपूर्वके व्यापारे, सम्प्रधारणे प्रार्थनायाञ्च, आशीः स्यात्तु हिताशंसा ॥

प्रेषणाध्येषणानुज्ञा त्रिविधा स्यात्प्रवर्त्तना ।
अधःकक्षे चोर्ध्वकक्षे समकक्षे जनक्रमात् ॥ १ ॥

मू. ट.

लघुसिद्धान्तकौमुदी—श्रीवरदराजविरचिता, टिप्पण्या सूत्राणामकारादिकोशेन च सहिता. ... ... ०॥ ०-

लघुधातुरूपसंग्रहः—अत्र प्राचीनपण्डितवरसुबोधशास्त्रिप्रणीताः सोपसृष्टधात्वर्थादर्शनामिकाः कारिकाः सव्याख्याः लकारार्थनिरूपणं च विद्यते । तथा च धातूनां लक्षणानि, अनुबन्धप्रयोजनानि, उपसर्गार्थनिरूपणं च । ०॥ ०॥

व्युत्पत्तिवादः—गूढार्थतत्वालोकव्याख्यासहितः. ... ४ ०॥

शब्दरूपावलिः—गुर्जीकरकृता. ... ... ०- ०॥

समासचक्रम्. ... ... ०॥। ०॥

सारस्वतपूर्वपक्षावलिः. ... ... ०॥। ०॥

सारस्वतव्याकरणम्—चन्द्रकीर्तिप्रणीतव्याख्यासहितम् (वृत्तित्रयात्मकम्.) ... ... २॥ ०॥

सारस्वतव्याकरणम्—चन्द्रकीर्तिव्याख्यासहितम् । **पूर्वार्ध**. ... ... १ ०॥

सारस्वतव्याकरणम्—चन्द्रकीर्तिव्याख्यासहितम् । **उत्तरार्ध**. ... ... १॥ ०॥

सारस्वतव्याकरणं पूर्वार्धम्—वस्त्रबद्धम्. ०- ०-

सारस्वतव्याकरणं पूर्वार्धम्—पत्रमात्रबद्धम्. ... ०॥ ०॥

सारस्वतव्याकरणं—वृत्तित्रयात्मकम्—पत्रमात्रबद्धम् ... ... ०॥ ०-॥

सारस्वतव्याकरणं वृत्तित्रयात्मकम्—इदं पुस्तकं प्राचीनहस्तलिखितपुस्तकान्येकीकृत्य संशोधय्य च मुद्रितम् । केवलं वस्त्रबद्धपुस्तकस्य. ... ... ०॥। ०॥

सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता, अष्टाध्यायीसूत्रपाठः, गणपाठः, धातुपाठः, लिङ्गानुशासनं, शिक्षा, सूत्रानुक्रमणी चेत्येतैः सहिता. २ ०-

तुकाराम जावजी,
निर्णयसागरमुद्रणालयाधिपतिः—मुंबई ।